दिनाङ्क :-03.01.2025

प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्री-परियोजना

प्रधानमन्त्री नरेन्दमोदी अद्य नवदिल्ल्यां नैकासां विकासात्मक- परियोजनानां शिलान्यासम् उद्घाटनं च करिष्यति। असौ राष्ट्रियराजधान्याः अशोकविहारे अनिर्मितेषु आश्रयेषु निवसद्भ्यः आर्थिकरूपेणं वञ्चितजनेभ्यः भूयोऽपि सप्तदशशत- नवनिर्मितानि भवनानि समर्पयिष्यति अपि च पात्र - लाभार्थिभ्यः कुञ्जिकाः प्रदास्यति। एतेषां नवनिर्मितानां भवनानाम् उद्घाटनेन सहैव दिल्ली- विकासप्राधिकरणद्वारा विहिता पुनर्वास- परियोजना पूरयिष्यते। अस्याः परियोजनायाः उद्देश्यं तत्रस्थानां निर्वासनां कृते सुखसुविधाभिः पूरितं उत्तमं स्वस्थं च जीवनपर्यारणप्रदानमिति वर्तते। अतरत्र श्रीमोदी राजधान्यां द्वयोः नगरीय- पुनर्विकास- परियोजनयोरपि उद्घाटनं करिष्यति ययोः नौरोजीनगरे विश्वव्यापारकेन्द्रस्य अथ च सरोजिनीनगरे द्वितीयश्रेण्याः सामान्यावासीय - आवासस्य उद्घाटनं सम्मिलितं विद्यते इति।

### वैष्णवः गुवाहाटीयात्रा

केन्द्रीयसूचनाप्रसारणमन्त्री अश्विनी- वैष्णवः अद्य असमराज्ये विविधानां परियोजनानाम् उद्घाटनाय समर्पणाय हरितध्वजप्रदर्शनाय च गुवाहाटीं प्रति याति। अस्माकं वार्ताहरः सूचितवान् यत् अत्रावसरे असमराज्यस्य राज्यपालः एल्.पी. आचार्यः मुख्यमन्त्री हिमन्त- बिस्व-सरमाः अन्ये च केन्द्रीय- मन्त्रिणः उपस्थिताः भविष्यन्ति । केन्द्रीयमन्त्री गुवाहाटीं सम्प्राप्य त्रिभ्यः रेलयानेभ्यः गुवाहाटी- न्यू- लखीमपुर- जनशताब्दी एक्सप्रेस- न्यू- बोंगाईगांव- गुवाहाटी यात्रिरेलयान - तिनसुकिया- नाहरलागुन - एक्सप्रेसइत्येतेभ्यः हरितध्वजं प्रदर्शयिष्यति। अथ च

गुवाहाटीतः आकाशाणी- कोकराझार इत्यत्र दश- किलोवाट- मितस्य एफ. एम्. ट्रांसमीटर- इत्येतस्य आभासियमाध्यमेन उद्घाटनं करिष्यति।

## मतस्यजीवनः

विदेशमन्त्रालयेन घोषितं यत् पञ्चनवतिसंख्यकाः भारतीय- मत्स्य- जीविनः बाङ्ग्लादेशस्य अधिकारिभिः भारतीय तटरक्षक - बलाय समर्पयिष्यन्ते। उभयोः देशयोः तटरक्षकाधिकारिणां मध्ये पारस्परिकादानप्रदानरूपेण प्रत्यावर्तनाभियानस्य भागरूपेण च नवतिसङ्ख्यकाः बाङ्ग्लादेशीयाः मत्स्यजीविनः अपि बन्धनरहिताः भविष्यन्ति इति सूच्यते।

## सञ्चार - कुम्भः

केन्द्रीयसञ्चारमन्त्रालयेन उद्घोषितं यत् माझा- कुम्भ-मेलकस्य सज्जतायां दूरसञ्चारविभागेन प्रयागराजे मेलापक क्षेत्रे प्रमुखेषु सार्वजनिक स्थलेषु च निर्बाधतया सञ्चारसैविध्यं सुनिश्चितुं व्यापकी व्यवस्था समनुष्ठिता। दूरसञ्चार सेवाप्रदातृभ्यः दिङ्निर्देशः प्रदत्तः यत्ते विश्वस्य बृहत्तमे धार्मिकोत्सवे अपेक्षितानाम् उपस्थितानां जनानां प्रवाहस्य समायोजनार्थं उन्नतप्रौद्यौगिकीनाम् संयोजनम् अथ च आन्तर्जालालिक- अनुकूलतां च सुनिश्चीकुर्वन्तु इति।

## हॉकी प्रतिस्पर्धायां

हॉकी इण्डिया लीग इत्येतस्यां प्रतिस्पर्धायां ह्यः रात्रौ ओडिशायाः राउरकेलायाः बिरसामुण्डा क्रीडाङ्गणे यूपीरूद्राजइत्यनेन दलेन सूरमा- हॉकी- क्लब इत्येद्दलं त्रीणि शून्यम् इत्यङ्कान्तरालेन पराजितम्।